Research Paper E-ISSN NO : 2455-295X | VOLUME : 7 | ISSUE : 1 | JANUARY 2021

# विशिष्टाद्वैतसिद्धान्ते आत्मा – एकम् विश्लेषणम्

**APURBA GORAI [1]**

[1] ASSISTANT PROFESSOR, DEPT. OF SANSKRIT, MAHATMA GANDHI COLLEGE, LALPUR.

## ABSTRACT:

**KEYWORDS:**

रामानुजदर्शने ईश्वरस्य परिपूर्णता सोपाधिका येन तस्य सर्वव्यापिक्षेत्रे आत्मनां सत्तायाः अपि स्थानमस्ति ये च ईश्वरादेव सर्वमधिगच्छन्ति तथापि तेषु स्वेच्छायाः चयनयोग्यतायाः सत्त्वात् ते पुरूषकथनयोग्याः भवन्ति। आचार्यरामानुजः यान् मनुष्यान् तस्यैव निरपेक्षसतायाः निरर्थकं परिवर्तितरूपं मन्यन्ते तान् प्रति दृढ़ तर्कमुपस्थापयति। आत्मा परब्रह्मणः एव एकांशः यथार्थभूतः इत्यादि बुद्धिसम्पन्नः चैतन्याखण्डापरिवर्तनशीला दृस्याणुरूपकोस्ति – **स विशेषो भगवत्सङ्कल्प एव विमुखरूपं भगवन्तमाश्रितः**[1] – अयञ्चात्मा शरीरेन्द्रिप्राणबुद्धिभिन्नः ज्ञाता कर्ता भोक्ता चापि विद्यते। मानवीयस्तरे स्तूलशरीरेण प्राणैश्च युक्तोऽस्ति तथैव पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्च एतस्य साधनानि सन्ति मनः आत्मार्थं आन्तरिकावस्था प्रकाशयति, इन्द्रियैश्च वाह्यावस्थाज्ञानमपि प्रापयति। मनसः व्यापारत्रयम् अध्यायः अभिमानः चिन्तनश्च – **स च देहेन्द्रिय मनः प्राणधीभ्यो विलक्षण**[2] जीवः अण्वाकारः सन्नपि ज्ञानगुणेन प्राप्तसंकोचविस्तारः अखिलशरीरे व्याप्तः सुखदुःखानि अनुभवति यथा दीपशिखा लघुरपि स्वप्रकाशेन पदार्थान् प्रकाशयति। आत्माबोधः यथा चेश्वरविषये स्वरूपनित्यता, आत्मनिर्भरता सर्ववस्तुव्यापित्वं, निर्दोषत्वं इति गुणाश्रयत्वेन तथैव भवति। आत्मनामेकत्वं सुखदुःखविभागेन स्पष्टं भवति। जीवात्मनः सारतत्त्वं अहं बुद्धिरस्ति नायमात्मा केवलं गुणमात्रं यः नश्येत्, जीवात्मनः अनिवार्यं मुख्यस्वरूपं चापि अप्रभावितो भवेत्।

आत्मनिरूपणमेव आत्मनः वास्तविकमस्तित्वं बन्धमोक्षावस्थाद्वये आत्मस्ववैशिष्ठ्यं गच्छति आत्मा सक्रियः कर्ता विद्यते।

न आत्मनः तात्त्विकस्वरूपे परिवर्तनं भवति यासु अवस्थासु परिवर्तते तौस्तः बुद्धिसंकोचविकासौ। एवं परिवर्तने यत्र ईश्वरोत्पत्तिः निर्भरातात्त्विकस्वरूपे परिवर्तनमस्ति। आत्मविशिष्टलक्षणानि दुःखसम्भावनादिकानि नेश्वरे संघटन्ते केवलं ईश्वर एव तात्त्विकस्वरूपपरिवर्तने स्वतन्त्रः जड़पदार्थानां संकोचविकासरूपविशिष्टलक्षणरहितश्च विद्यते यञ्च आत्मविशिष्टलक्षणम्।

जीवस्य वर्गत्रयं नित्यो मुक्तो बद्धश्च। नित्यजीवाः कर्मप्रकृतिबन्धरहिताः स्वतन्त्रजाः वैकुण्ठलोके सर्वदा निवसन्तो भगवतो नारायणस्य प्राप्तनित्यकैङ्कर्याः आनन्दमनुभवन्ति। मुक्ताश्च स्वज्ञानपुण्यभक्तिभिः मोक्षं लभन्ते। बद्धाश्च स्वकीयाज्ञानेन स्वार्थबुद्ध्या कर्मबन्धनपरावशाः संसारचक्रे परिभ्रमन्ति –

**नित्यवद्ध सस्स्वयं चेत् मोक्षार्धस्व प्रयन्तवैफल्यादिति भावः**[3]

। जीवो यावद् बन्धने तिष्ठति तावत् तस्य सूक्ष्मशरीरस्यापि अस्तित्वं तिष्ठति। मुक्तात्मानः जीवाः देवयानमार्गेण, पुण्यात्मनश्च पितृयानमार्गेण गच्छन्ति। किन्तु पापात्मानश्च चन्द्रालोकं यावद् गत्वा तं लोकमप्राप्यैव पृथिवीलोकमायाति। नारायणदूताः वैकुण्ठलोकमार्गमुपदिशन्ति मुक्तात्मनः – **अतः क्षीणकर्मणोऽपि सूक्ष्मशरीर युक्तस्य,**[4] **देवयानेन गगनमुपपद्यते**[5] जीवस्य ब्रह्मणः पृथगस्तित्वस्य सत्त्वादपि स न ब्राह्मणः स्वतन्त्रः। अतः ब्रह्मण सह जीवस्य सम्बन्धं ज्ञानं विना न जीवस्वरूपं ज्ञातुं शक्यते। श्रुतिषु जीवब्रह्मणोः सम्बन्धे क्वचिद्भेदः क्वचिच्चाभेदः सम्बन्ध इति निरूपणं विद्यते। श्रुतिवर्णिताभेदस्य तात्पर्यमिदमस्ति यत् ब्रह्म प्रत्येकमखिलचराचरजगति च व्याप्तमतः जीवेऽपि व्याप्तमन्तस्थञ्च सत् तं नियमयति। तत्त्वमसि इति वाक्यस्यापि तथैवार्थः करणीयः। त्विमित्यस्य तात्पर्यमस्ति चिदचिद्विशिष्टं ब्रह्म, यश्चान्तर्यामि विद्यते। अत एवात्र योऽभेदः कथितः सः ब्राह्मणः एकस्मिन् प्रकारेऽपरे प्रकारे चास्ति। एतस्य तात्पर्यमात्मानि स्थितमन्तर्यामि ब्रह्म विश्वस्य च कारणं ब्रह्म उभयोस्तात्विकमैक्यमस्ति।

रामानुजदर्शनस्य सर्वतः एतदेव महद्वैशिष्ट्यं यदिदं ब्रह्मणः पुरूषवादधारणं ब्रह्मवादधारणायां संयुनास्ति ईश्वरवादब्रह्मवादयोरेकीकरणेप्रयन्तोऽतीव प्राचीनः यश्च वैदिकसाहित्येऽपि दृश्यते। गीतायामपि अस्य संश्लेषणस्य प्रयासो विहितोऽस्ति, परन्तु दार्शनिकस्य धार्मिकस्य चेति पक्षद्वयस्य यादृशं व्यवस्थितं समन्वयं आचार्यरामानुजः कृतवान् एतस्याधारेण एतस्मिन् विषये कथनमिदमनुचितं भवेत् यदेतस्येश्वरवादः पाञ्चरात्रागमोक्तः आलवारमतप्रभावितो विद्यते।

आचार्यरामानुजदर्शनस्य एतदेव वैशिष्ट्यं यदत्र उभयोर्दोषयोः परिहारो विहितोऽस्ति। आचार्यरामानुजसिद्धान्ते ईश्वरः ब्रह्म च न भिन्नं तत्त्वमपितु एकमेव। स चाखिलवैविध्यं जगत् न मायाजन्यत्वात् मिथ्या मन्यतेऽपितु ब्रह्मणोऽङ्गभूतं मन्यते। तस्य धार्मिकभावना ब्रह्मणः सगुणः साकारं रूपं प्रकाशयति, तार्किकबुद्धश्च चराचरमखिलं जगत् ब्रह्मणः शरीरं विशेषणं वा इति स्वीकाराय तं प्रेरयति। इत्थमाचार्यरामानुजदर्शने धार्मिकभावनायाः तार्किकबुद्धेश्च पुष्टेः समन्वयस्य च श्रेष्ठःप्रयासः

समुपलभ्यन्ते । इदीनीं संक्षिप्तरूपेण चर्चितानामेतेषां विस्तारेण वर्णनं क्रियते ।

आचार्यरामानुजस्य मतेन ब्रह्म चिदचिद्भ्याम् विशिष्टमस्ति । अत एव सः सिद्धान्तः विशिष्टाद्वैतसिद्धान्तः कथ्यते । तस्य मते ब्रह्म न निर्विशेषमपितु सविशेषं वर्तते । जीवो जगच्च तत् विशिष्टः । जीवेश्वरयोः अद्वैतं यद्यपि अवश्यमस्ति परन्तु इदं विशिष्टप्रकारकमेकम् अद्वैतं वर्तते । शङ्कराचार्यः आत्मनः ज्ञानस्वरूपं मन्यते । रामानुजाचार्यस्तु आत्मनं ज्ञानं न मन्यते, अपितु ज्ञातारं मन्यते । आत्मा तु स्वयमणुरस्ति । किन्तु तस्य धर्मभूतज्ञानं विभु वर्तते । सुखदुःखादिविकाराः धर्मभूतज्ञानस्य विकाराः परिणामा वा सन्ति । ज्ञानं चेतनात्मनः ईश्वरस्य च गुणोऽस्ति । ज्ञानम् आत्माश्रितं वर्तते । यतो हि आत्मनं विना ज्ञानस्य सिद्धिर्न भवितुम् अर्हति । आत्मनः ज्ञानस्य च सम्बन्धः दीपकप्रकाशसम्बन्ध इव वर्तते । आभादीपकः ज्ञानं च तस्य प्रकाशोऽस्ति । अद्वैतादी आत्मनः विभुं कथयति । विशिष्टाद्वैतवादी तमणुं मन्यते । अद्वैतमते जीवः स्वभावतः एकं परन्तु देहाद्युपाधिभिः सः नानारूपेण प्रतीयते । रामानुजाचार्यानुसारेण जीवः अनन्तः परस्परं एकस्मात् द्वितीयो भिन्नोऽस्ति । स्फुल्लिङ्गः यथा अग्नेरंगः तथैव जीवोऽपि ब्रह्मणोऽशः । अतः जीवब्रह्मणोः अंशाशिभावः विशेष्यविशेषणभावो वा सम्बन्धो वर्तते । जीवेश्वरयोः अभेदसूचिका एकता नास्ति । यतो हि जीवः अल्पज्ञः ब्रह्म च सर्वज्ञम् अस्ति । किन्तु ईश्वरः प्रेत्यकं जीवस्य अभ्यन्तरे अन्तर्यामितया व्याप्तोऽस्ति । जीवेश्वरौ नैका भवतः यथा अंशः अंशिनि, गुण द्रव्ये, विशेषणं विशेष्ये, निर्भरं तथैव जीवः ईश्वरस्य निर्भरोऽस्ति । अतएव ईश्वरस्य शरणं विना जीवस्य कल्याणं न भवितुमर्हति । ईश्वरस्य शरणागतिः प्रपत्तिरेव जीवाय सर्वश्रेष्ठसाधनं वर्तते । आचार्यरामानुजः तत्त्वमसि इति वाक्यस्य शब्दार्थं विशेषप्रकारेण विहितवान् । वाक्येऽस्मिन् तत्पदस्य तात्पर्यमस्ति ईश्वरः यः सर्वज्ञ सर्वशक्तिमान् सृष्टिकर्ता चास्ति, त्वं इति पदस्य तात्पर्यमस्ति सः ईश्वरः यः अचेतनशरीरविशिष्टे जीवे अचिद् विशिष्टजीवशरीरकोऽस्ति । ईश्वरस्य विशिष्टरूपस्यैकस्य द्वितीयविशिष्टरूपे अभेदोऽस्ति । अतएव सिद्धान्तोऽयं विशिष्टाद्वैतसिद्धान्तः कथ्यते । ब्रह्म एतयोः द्वयोः प्रभेदयोः विद्यमानमस्ति । आचार्यरामानुजासारेण शरीरात्मनौ उभावपि सत्यौ स्तः ब्रह्मः अचिदंशात् शरीरमुत्पद्यते । आत्मा नित्यः चित्तत्त्वमस्ति । सोऽपि ईश्वरांश एव । आत्मा सूक्ष्मत्वाद् भौतिकतत्त्वे प्रवेष्टुमर्हति । चैतन्यमात्मनो गुणः सदैव तत्र तिष्ठति । आत्मा शरीरस्य प्रत्येकं भागं चैत्यन्येन पूरयति । यथा – लघुः दीपकः सम्पूर्णः प्रकोष्टं प्रकाशयति । आचार्यरामानुजः जीवानाम् अनेकत्वस्य समर्थको वर्तते । मुक्तावस्थायामपि जीवेषु भिन्नता भवत्येव । मुक्तावस्थाप्राप्तजीवेषु गुणात्मकभेदो नास्ति । परन्तु सांख्यात्मकभेदो वर्तते । जीवात्मानः अनन्ताः सन्ति । जीवानां त्रयो भेदाः वर्तन्ते – बद्धः, मुक्तः, नित्यः । संसारे बद्धजीवाः उत्पन्नाः शरीरस्थाः भवन्ति । मुक्तजीवाः भगवति तदाकाराकारिताः दिव्यशरीरं प्राप्नुवन्ति । नित्यजीवाः संसारे कदापि न आयान्ति । तथापि भगवता सह वैकुण्ठे निवसन्ति ।

विशिष्टाद्वैतसिद्धान्ते मुक्तेरर्थः जीवात्मनः ब्रह्मणि लीनत्वं नास्ति । यतो हि जीवः ब्रह्मणोऽशः ब्रह्म च अंशि विद्यते । ईश्वरसाक्षात्कार एव मोक्षः । मुक्तात्मा ईश्वरसाहचर्यं लभते, न च तादाम्यीकरणम् । भगवतः कृपां विना मोक्षोऽसम्भवः । भक्तिः प्रपत्तिश्च मोक्षसाधने स्तः । तत्त्वमुक्ताकलापस्य जीवसरप्रकरणे आचार्यवेदान्तदेशिकः जीवस्य प्रकाशद्वयेन विश्लेषणं प्रस्तुतवान् –

निषेधात्मकप्रकारः

सकारात्मकप्रकारः

प्रथमप्रकारे आचार्यः जीवस्य शरीरेन्द्रियमनः प्राणबुद्धिभ्यः पार्थक्यं साधितवान् । द्वितीयप्रकारानुशीलने जीवस्य नित्यत्वाणुत्वस्वयं प्रकाशत्व कर्तृत्व-भोक्तृत्व-कर्मस्वातन्त्र्यानि साधितवान् ।

वेदान्तदेशिकः यामुनाचार्यमनुस्मरन् जीवस्य शरीरेन्द्रियमनःप्राणेभ्यः अन्यतायाः सिद्धान्तं स्वीकृतवान् । एददर्थं सः सर्वप्रथमं चार्वाकेन सह तर्कं करोति । यतो हि चार्वाकः शरीरमेव आत्मा मन्यते । चार्वाकः स्वमतसमर्थने तर्कं प्रस्तौति । यत् यथा किण्वादिकमादकद्रव्येषु-मादकता स्वयमेवोपपद्यते तथैव शरीरेऽपि स्वयमेव चैतन्यमुत्पद्यते । इमं सिद्धान्तं खण्डयन् आचार्यवेदान्तदेशिकः कथयति मादकपदार्थेषु मादकता गुणः पूर्वत एव विद्यमानो भवति । किन्तु जड़शरीरे सर्वदा चैतन्यं न विद्यते । अतः मादकद्रव्यदृष्टान्तः सर्वथा अनुपयुक्तोऽस्ति –

**किण्वादीनां संसर्गविशेषमदशक्तिः**[6] वेदान्तदेशिकानुसारेण आत्मा देहाद् भिन्नोऽस्ति । यतो हि एतौ मम हस्तौ एतौ च मम पादौ इत्यादि अनुभवः सर्वैः क्रियते । शरीराद् भिन्नः स आत्मा विद्यते – **यो मे हस्तादिवर्ष्मेत्यवयवनिवहात्भाति भिन्नस्स एकः**[7]

तत्त्वमुक्ताकलापः, 2.1 लोकाचार्यः इदं शरीरम् इदं शरीरञ्च एतैः प्रत्ययैः आत्मनं साधयति – आत्मस्वरूपं कथं देहादिविलक्षमिति चेद् ? देहादीनां मम

**देहादिकनित्यात्मनं पृथगुपलभ्यमानत्वात् इदमित्युपलभ्यामानत्वात्** ।।[8]

यतीन्द्रमतदीपिकाकारः देहेन्द्रियमनः प्राणेभ्यः विलक्षणामात्मनः अस्तित्वविषये इदं मम शरीरम् इत्यनुभवं प्रमाणरूपेण प्रस्तुतवान् । न्यायवैशेषिकौ शरीरात् पृथक् आत्मनः सिद्धिं एतत् तथ्येन कृतवन्तौ यत् चेत् शरीरमात्मा स्यात् तदा हस्तपादादीनां नाशेन आत्मनोऽपि नाशः स्यात् । किन्तु तथा न भवति । अतः शरीरात् पृथगेव आत्मतत्त्वम् इति स्वीकरणीयम् । वेदान्तदेशिकः शरीरम् आत्मा इति स्वीकर्तॄन् अपृच्छत् । आत्माशररे कुत्र वसति सर्वेषु अवयवेषु शरीरस्य एकस्मिन् अवयवे वा । चेत् प्रत्येकम् अवयवेषु आत्मा मन्यते तर्हि शरीरे बहवः आत्मानः भविष्यन्ति । तेषु च मिथः कलहो भविष्यति । फलतः चैतन्यः वीतरागो भवेत् । वीतरागे सति न किमपि कार्यं कुर्यात् –

**ननु मनुष्योऽहं ब्राह्मणोऽहं इत्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न शरीरस्यात्मत्वे करणादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात्**[8] वीतरागस्य तु जन्मापि न भवति । चेत् एकस्मिन् अवयवे चैतन्यं स्वीक्रियेत तर्हि तदंशविशेषस्य अभावे अयोग्ये वा सति अतीतानुभवस्य न कोऽपि स्मृतिं प्राप्स्यति । वर्तमानस्यानुभवेऽपि चैतन्यस्य एकांशे स्थितत्वात् सुखदुःखानुभवं सप्पूर्णं शरीरं न करिष्यति – **प्रत्येकं चेतनत्वे बहुरिहकलहो वीतरागो न जातः**[9]

चेत् अवयवसंघातमात्मानं मन्येत तदपि सम्भवं नास्ति । यतो हि यदा एकस्मिन् अंगे आत्मा नास्ति तर्हि अङ्गसमाहारेऽपि कथं भवितुं शक्नुयात् । संघातस्वीकारे एकः अन्यः दोषः अयमस्ति यत् शरीरं घटपटादितुल्यं चैतन्यंशून्यं भविष्यति । संघातः परम्पराय भवति । यस्य सः स्वार्थं साधयति । चैतन्यसंघातरूपः आत्मा नास्ति । यतो हि सः कस्यापि अन्यस्य स्वार्थाय स्वकीयमस्तित्वं न रक्षति । अनेकेषां चैतन्यानां संघातस्वीकारे तेषु परस्परं ईर्ष्या, असूयादिदोषाः भविष्यन्ति – **बहुनां हि चेतनानां कार्यवशात्संहतानामापि परस्परमीर्ष्यारूपादयो दृश्यन्ते** ।[10]

आत्मा शरीरात् पृथग् अस्ति । यतो हि शरीरं क्षेत्रम् आत्मा च क्षेत्रज्ञोऽस्ति । स्मृतीनामनुसारेणऽपि शिरः हस्तपादाद्यवयवैः युक्तेन

शरीरेण पुरूषः (आत्मा ) अतिरिक्तोऽस्ति ।

## REFERENCES

1. यतीन्द्रमतदीपिका .पृ.185.
2. यतीन्द्रमतदीपिका – पृ. 139.
3. पृ.104. आनन्ददायिनी व्याख्या
4. तत्वमुक्ताकलापः 2.27.
5. ब्रह्मसूत्रश्रीभाष्यम् 3.3.30
6. सर्वार्थसिद्धिः 2.1.पृ.290.
7. सर्वार्थसिद्धिः 2.1 पृ 289.
8. तर्कदीपिका पृ 13.
9. तत्त्वत्रयम् पृ. 25
10. सर्वार्थसिद्धिः 2.1 ।